# U.G. 3rd Semester Examination - 2022

# SANSKRIT

## [HONOURS]

## Course Code : SANH-CC-T-5

Full Marks : 60 Time : $2\frac{1}{2}$ Hours

*The figures in the right-hand margin indicate marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

1. संस्कृतेन देवनागरीलिप्या च यथारुचि **दश** प्रश्ना: समाधेया: : 2×10=20

   i) यौगन्धरायण: कथं वासवदत्तामाश्रमपदं नीतवान्?

   ii) ''अस्यां मे महती स्वता''—इति कस्य: कां प्रति उक्ति:?

   iii) ब्रह्मचारी कस्मान्नगरात् कथं प्रत्यागत:?

   iv) वासवदत्ता केन नाम्ना छद्मपरिचये कस्य सकाशे न्यासरूपेण उपन्यस्ता?

   v) काञ्चुकीय: क:?

   vi) दुष्यन्तस्य जन्म कस्मिन् बंशे अभूत्? कस्य नगरस्य राजा स:?

   vii) ''अस्मिन् क्षणे विस्मृतं खलु मया।''—इति कस्य कथमेतादृशी उक्ति:?

   viii) 'मौर्वीकिणाङ्क:'—इत्यस्य पदस्य सविग्रहं समासनाम लेख्यम्।

ix) कुत्र केन प्रकारेण शकुन्तलायाः अङ्गुरीयकं भ्रष्टम्?

x) मारीचः कः?

xi) कण्वस्य आश्रमः कुत्र आसीत्?

xii) भरतवाक्यं तावत् किम्?

xiii) पतिगृहगमनकाले शकुन्तलायै कैः किं किं दत्तम्?

xiv) अभिज्ञानशकुन्तलस्य प्रस्तावनाया नाम किम्?

xv) अभिज्ञानशकुन्तले विदूषकस्य नाम किमस्ति? स दुष्यन्ताय किं सम्बोधनपदं प्रयुक्तवान्?

2. यथामति सुरगिरा वङ्गभाषया आङ्गलभाषया वा **चत्वारः** प्रश्नाः समाधेयाः : $5 \times 4 = 20$

i) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवादः कार्यः :

a) चलापाङ्गां दृष्टिं स्पृशसि बहुशो बेपथुमतीं
रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः ।
करं व्याधुन्वत्याः पिवसि रतिसर्वस्वमधरं
वयं तत्त्वान्वेपान्मधुकर! हतास्त्वं खलु कृती।।

b) रम्यान्तरः कमलिनीहरितैः सरोभिः
छायाद्रुमैर्नियमितार्कमरीचतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपबनश्च शिवश्च पन्थाः।।



ii) वङ्गभाषया आङ्गलभाषया वा यथेच्छ**मेकस्य** अनुवादः कार्यः :

a) कः कं शक्तो रक्षितुं मृत्युकाले
रज्जुच्छेदे के घटं धारयन्ति।
एवं लोकस्तुल्यधर्मा वनानां
काले काले छिद्यते रुह्यते वा।।

b) धीरस्याश्रमसंश्रितस्य बसतस्तुष्टस्य वन्यैः फलै-
र्मानार्हस्य जनस्य वल्कलवनस्त्रासः समुत्पाद्यते।
उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः
कोऽयं भो ! निभृततपोवनमिदं ग्रामीकरोत्याज्ञया।।

iii) अभिज्ञानशकुन्तलान्तर्गतस्य धनमित्रवृत्तान्तस्य नाटकीयतात्पर्य विवृणुत।

iv) स्वप्नवासवदत्ते ब्रह्मचारिवृत्तान्तं सतात्पर्यमुपश्थापयत ।

v) 'यथेच्छ**मेकम**वलम्ब्य संक्षिप्तां टीकां लिखत :

a) भासनाटकचक्रम्

b) अश्वघोषः

c) भवभूतिः

vi) विशाखदत्तकृतिमुपस्थापयत ।

3. स्वच्छन्दं प्रश्न**द्वयस्य** समाधानं विधेयम्। द्वयोः प्रश्नयो**रेकस्य** उत्तरं संस्कृतेन देवनागरीलिप्या च लेख्यम् : $10 \times 2 = 20$

i) a) यथेच्छ**मेकस्य** सुरगिरा देवनागरीलिप्या च सप्रसङ्गं व्याख्या कार्या : $6 \times 1 = 6$

पूर्वं त्वयाव्यभिमसं गतमेवमासी च्छ्लोध्यं गमिष्यसि
कालक्रमेण जगतः पुनर्विजयेनभर्तुः परिवर्तमाना।
चक्रारपंक्तिरिव गच्छति भाग्यपंक्तिः।।

**अथवा**

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतु:।
जातो ममायं विशद: प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा।।

b) यथेच्छमेकस्या: पङ्क्ते: भावसम्प्रसारणं कार्यम् : 4×1=4

दु:खं न्यासस्य रक्षाणम्।

**अथवा**

सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्त:करणप्रवृत्तय:।

ii) हंसपदिका का? अभिज्ञानशकुन्तले हंसपदिकागीतस्य नाटकीयतात्पर्यं प्रतिपादयत।

iii) स्वप्नवासवदत्तमवलम्ब्य पद्मावतीवासवदत्तयो: चरित्रद्वयं तुलयत।

iv) संस्कृत-नाटकानामुद्भवविषये विदुषां मतिरूपस्थापनीया।